१४

248sk14

रामकृता हनुमत्प्रशंसा

प्रस्तावना

ऐन्द्रादीनि नव व्याकरणानि वर्तन्ते इति प्रसिद्धिः अस्ति। हनुमान् तु तानि सर्वाणि एव व्याकरणानि जानाति स्म। "सोऽयं नवव्याकरणार्थवेत्ता" इति वाल्मीकिवचनं तत्र प्रमाणम् आवहति। व्याकरणं विहाय अपि शिक्षादीनि नानाशास्त्राणि तेन ज्ञातानि। ज्ञानस्य अनन्तः पारावारः आसीत् हनुमान्। स्वयं सर्वज्ञः भगवान् श्रीरामः अस्मिन् विषये तं प्रशस्तवान्। तस्य वाक् एवं मधुरा आसीत् यत् स तया मनोहरवाचा परमानन्दं श्रीराममपि आनन्दितवान्। हनुमान् आसीत् वानरराजस्य सुग्रीवस्य दूतः, एवम्भूतः दूतः कस्यापि राज्ञः भवति चेत् स राजा अवश्यमेव सिद्धिं गच्छेत् इति भाषितवान् श्रीरामः। अस्मिन् पाठे वयं हनुमतः तादृशज्ञानविषये ज्ञात्वा आनन्दम् अनुभवामः। भगवान् श्रीरामः प्रथमसाक्षात्कारे एव स्वभक्तस्य एवं ज्ञानं वर्तते इति ज्ञात्वा किदृशीं प्रशंसां कृतवान् इति जानीमो वयं पाठस्यास्य पठनेन। पाठेऽस्मिन् द्वादश श्लोकाः विद्यन्ते।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- हनुमान् ज्ञानस्य महासागरः आसीत् इति अवगच्छेत्।
- हनुमान् चतुर्वेदज्ञः इति जानीयात्।
- वार्तालापसमये वाक्यप्रयोगः केन प्रकारेण कर्तव्यः इति विषये बोधं प्राप्स्यति।
- राज्ञः दूतः कथं भवेत् इति अवगमिष्यति।
- श्लोके स्थितानां पदानाम् अन्वयः केन प्रकारेण कर्तव्यः इति जानीयात्।
- श्लोकानां व्याख्या केन प्रकारेण कर्तव्या इत्यस्मिन् विषये ज्ञास्यति।
- व्याकरणविषयकं किञ्चित् ज्ञानं प्राप्नुयात्।

१४.१) मूलपाठः

एवमुक्त्वा तु हनुमांस्तौ वीरौ रामलक्ष्मणौ ।
वाक्यज्ञो वाक्यकुशलः पुनर्नोवाच किंचन ॥२४॥

एतच्छ्रुत्वा वचस्तस्य **रामो लक्ष्मणम् अब्रवीत्** ।
प्रहृष्टवदनः श्रीमान् भ्रातरं पार्श्वतः स्थितम् ॥२५॥

सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः ।
तमेव काङ्क्षमाणस्य ममान्तिकमिहागतः ॥२६॥

तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम् ।
वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तम् अरिन्दमम् ॥२७॥

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ।
नासामवेदविदुषः शक्यम् एवं विभाषितुम् ॥२८॥

नूनं व्याकरणं कृत्स्नम् अनेन बहुधा श्रुतम् ।
बहु व्याहरतानेन न किंचिद् अपशब्दितम् ॥२९॥

न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा।
अन्येष्वपि च सर्वेषु दोषः संविदितः क्वचित् ॥३०॥

अविस्तरमसंदिग्धम् अविलम्बितम् अव्यथम् ।
उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम् ॥३१॥

संस्कारक्रमसंपन्नाम् अद्भुताम् अविलम्बिताम् ।
उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम् ॥३२॥

अनया चित्रया वाचा त्रिस्थानव्यंजनस्थया।
कस्य नाराध्यते चित्तम् उद्यतासेररेरपि ॥३३॥

एवंविधो यस्य दूतो न भवेत् पार्थिवस्य तु ।
सिद्ध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ ॥३४॥

एवंगुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः ।
तस्य सिद्ध्यन्ति सर्वेऽर्था दूतवाक्यप्रचोदिताः ॥३५॥

१४.२) इदानीं मूलपाठम् अवगच्छाम

एवमुक्त्वा तु हनुमांस्तौ वीरौ रामलक्ष्मणौ।
वाक्यज्ञो वाक्यकुशलः पुनर्नोवाच किंचन।।२४।।

अन्वयः - वाक्यज्ञः वाक्यकुशलः हनुमान् तौ एवम् उक्त्वा तु पुनः किञ्चन न उवाच।

अन्वयार्थः - वाक्यज्ञः वाक्यतात्पर्यज्ञाता वाक्यकुशलः वाक्यप्रयोगे निपुणः हनुमान् तौ रामलक्ष्मणौ एवम् इत्थम् उक्त्वा कथयित्वा तु पुनः किञ्चन किञ्चित् न उवाच उक्तवान्।

सरलार्थः - वाक्यप्रयोगे कुशलः हनुमान् रामलक्ष्मणौ प्रति एवं सर्वम् उक्त्वा पुनः न किञ्चित् उक्तवान्, तूष्णीम् एव स्थितवान्।

तात्पर्यार्थः - अस्मिन् श्लोके महर्षिः वाल्मीकिः हनुमतः वाक्कुशलत्वं वर्णयति। हनुमान् रामलक्ष्मणयोः समीपम् आगत्य तयोः रूपस्य वीरत्वस्य प्रशंसां कृतवान्, किञ्च तयोः धनुषः बाणानां खड्गयोः अपि बहु प्रशंसां कृतवान्। अपि च ततः परं स स्वविषये स्वराज्ञः सुग्रीवस्य च विषये तौ प्रति उक्तवान्। सुग्रीवेण तस्य अत्र प्रेषणस्य कारणमपि स उक्तवान्। स एतावत्कालपर्यन्तम् एवं सर्वम् उक्त्वा सम्प्रति तूष्णीं स्थितवान्। येन रूपेण वाक्यविन्यासेन स तेषां विषयाणां प्रशंसां कृतवान्, तेन हनुमान् महान् वाक्यज्ञः, वाक्यप्रयोगे निपुणः च आसीत् इति ज्ञायते। तत् सर्वम् उक्त्वा स तूष्णीं स्थितवान्, पुनः न किमपि उक्तवान्।

व्याकरणविमर्शः -

- उक्त्वा - वच्-धातोः क्त्वाप्रत्यये उक्त्वा इति रूपम्।
- वाक्यज्ञः - वाक्यं जानाति इत्यर्थे ज्ञाधातोः कप्रत्यये वाक्यज्ञः इति रूपम्।
- वाक्यकुशलः - वाक्ये कुशलः वाक्यकुशलः इति सप्तमीतत्पुरुषसमासः।
- उवाच – वच्-धातोः लिटि प्रथमपुरुषैकवचने उवाच इति रूपम्।

सन्धिकार्यम् -

- हनुमांस्तौ = हनुमान् + तौ। (हल्-सन्धिः)
- वाक्यज्ञो वाक्यकुशलः = वाक्यज्ञः + वाक्यकुशलः। (विसर्गसन्धिः)
- पुनर्न = पुनः + न। (विसर्गसन्धिः)
- नोवाच = न + उवाच। (गुणसन्धिः)

प्रयोगपरिवर्तनम् - वाक्यज्ञेन वाक्यकुशलेन हनुमता तौ एवम् उक्त्वा तु पुनः किञ्चन न ऊचे।

एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत्।
प्रहृष्टवदनः श्रीमान्भ्रातरं पार्श्वतः स्थितम्।।२५।।

अन्वयः - तस्य एतत् वचः श्रुत्वा प्रहृष्टवदनः श्रीमान् रामः पार्श्वतः स्थितं भ्रातरं लक्ष्मणम् अब्रवीत्।

अन्वयार्थः - तस्य हनुमतः एतत् इदं वचः वचनं श्रुत्वा निशम्य प्रहृष्टवदनः उत्फुलमुखः श्रीमान् रामः पार्श्वतः पार्श्वे स्थितम् अवस्थितं भ्रातरं सहोदरं लक्ष्मणम् अब्रवीत् अवदत्।

सरलार्थः - हनुमन्मुखात् तद्विषये सुग्रीवविषये च सर्वं श्रुत्वा श्रीरामः आनन्दितः जातः। तस्य भ्राता लक्ष्मणः पार्श्वे आसीत्, तं लक्ष्मणं स किमपि वक्तुम् आरब्धवान्।

तात्पर्यार्थः - एतावन्तं दीर्घं कालं व्याप्य रामः तूष्णीं भूत्वा हनुमतः महत् भाषणं श्रुतवान्। अतः स इदानीं भाषितुम् आरब्धवान्। हनुमतः एतत् सर्वं वचनं श्रुत्वा रामः महान् आनन्दितः सञ्जातः। रामस्य पार्श्वे तस्य भ्राता लक्ष्मणः आसीत्। रामः हसन् पार्श्वे स्थितं भ्रातरं किमपि वक्तुम् उद्यतः अभवत्। एतावन्तं दीर्घं कालं स्वविषये प्रशंसादिश्रवणेन साधारणानां मनः चञ्चलं भवति। किन्तु रामः स्वप्रशंसां श्रुत्वा अपि अविचलितः सन् तूष्णीम् एव स्थितवान्। एतेन रामस्य धीरत्वं सिद्धं भवति।

व्याकरणविमर्शः -

- अब्रवीत् - ब्रूधातोः लङ्लकारे प्रथमपुरुषैकवचने अब्रवीत् इति रूपम्।
- प्रहृष्टवदनः - प्रहृष्टं वदनं यस्य सः प्रहृष्टवदनः इति बहुव्रीहिसमासः।
- स्थितम् - स्थाधातोः क्तप्रत्यये द्वितीयैकवचने स्थितम् इति रूपम्।

सन्धिकार्यम् -

- एतच्छ्रुत्वा = एतत् + श्रुत्वा। (श्चुत्व-सन्धिः)
- वचस्तस्य = वचः + तस्य। (विसर्गसन्धिः)
- रामो लक्ष्मणम् = रामः + लक्ष्मणम्। (विसर्गसन्धिः)

प्रयोगपरिवर्तनम् - तस्य एतत् वचः श्रुत्वा प्रहृष्टवदनेन श्रीमता रामेण पार्श्वतः स्थितः लक्ष्मणः अब्रूयत।

सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः।
तमेव काङ्क्षमाणस्य ममान्तिकमिहागतः।।२६।।

अन्वयः - अयं कपीन्द्रस्य महात्मनः सुग्रीवस्य सचिवः तम् एव काङ्क्षमाणस्य मम अन्तिकम् इह आगतः।

अन्वयार्थः - अयम् असौ कपीन्द्रस्य वानरराजस्य महात्मनः महाबुद्धेः सुग्रीवस्य सचिवः चरः तम् सुग्रीवम् एव काङ्क्षमाणस्य इच्छतः मम रामस्य अन्तिकम् समीपम् इह अत्र आगतः उपागतः।

सरलार्थः - हनुमतः वचनं श्रुत्वा आनन्दितः रामः भ्रातरम् उक्तवान् यत् - अहं सुग्रीवस्य कृते एव अत्र आगतः, किञ्च तस्य कपिराजस्य सुग्रीवस्य एव सचिवः अयं हनुमान् मम सपीपम् आगतवान् इति।

तात्पर्यार्थः - श्रीरामः हनुमतः वचनं श्रुत्वा आनन्दितः जातः। रामलक्ष्मणौ वानरराजेन सुग्रीवेण सह एव साक्षात्कारं कर्तुं वने अटन्तौ इमं देशम् आगतवन्तौ। अत्र च तस्य सुग्रीवस्य एव सचिवः

हनुमान् स्वयं तयोः समीपम् आगतवान्। अतः श्रीरामः आनन्दितः सन् पार्श्वे स्थितं भ्रातरं लक्ष्मणम् उक्तवान् यत् - अहं सुग्रीवम् इच्छन् अत्र आगतः, किञ्च अयं हनुमान् तस्य वानरराजस्य सुग्रीवस्य एव सचिवः मम अन्तिकम् आगतवान् इति।

व्याकरणविमर्शः -

- कपीन्द्रस्य – कपीनाम् इन्द्रः कपीन्द्रः इति षष्ठीतत्पुरुषसमासः, तस्य कपीन्द्रस्य।
- काङ्क्षमाणस्य – काङ्क्ष्- धातोः शानच्प्रत्यये षष्ठ्येकवचने काङ्क्षमाणस्य इति रूपम्।

सन्धिकार्यम् -

- सचिवोऽयम् = सचिवः + अयम्। (विसर्गसन्धिः)
- ममान्तिकम् = मम + अन्तिकम्। (सवर्णदीर्घसन्धिः)
- इहागतः = इह + आगतः। (सवर्णदीर्घसन्धिः)

प्रयोगपरिवर्तनम् - अनेन कपीन्द्रस्य महात्मनः सुग्रीवस्य सचिवेन तम् एव काङ्क्षमाणस्य मम अन्तिकम् आगतम्।

तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम्।
वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिन्दमम्।।२७।।

अन्वयः - सौमित्रे! तं सुग्रीवसचिवं कपिं वाक्यज्ञम् अरिन्दमं स्नेहयुक्तम् मधुरैः वाक्यैः अभ्यभाष।

अन्वयार्थः - सौमित्रे! हे लक्ष्मण तं हनुमन्तं सुग्रीवसचिवं सुग्रीवानुचरं कपिं वानरं वाक्यज्ञं वाक्यरचनाभिज्ञम् अरिन्दमं शत्रुनाशकं स्नेहयुक्तम् प्रीतियुक्तम् मधुरैः मनोहरैः वाक्यैः वचनैः सुमधुरवचनैः अभ्यभाष अभिभाषस्व।

सरलार्थः - रामः पार्श्वे स्थितं भ्रातरं लक्ष्मणम् उक्तवान् यत् - हे लक्षण! सुग्रीवसचिवः हनुमान् यथा स्नेहयुक्तः भवति, तथा मधुरवचनैः भाषणं कुरु इति।

तात्पर्यार्थः - रामः पार्श्वे स्थितं भ्रातरं लक्ष्मणम् उक्तवान् यत् - सुग्रीवस्य सचिवः अयं हनुमान् महान् ज्ञानी अस्ति। वाक्यप्रयोगविषये अस्य महती निपुणता वर्तते। अयं हनुमान् शत्रूणां नाशकः अस्ति। हे सुमित्रानन्दन लक्ष्मण! त्वम् अनेन हनुमता सह तव मधुरवाक्यैः एवं भाषणं कुरु, येन स स्नेहयुक्तः प्रीतः भवेत् इति। वस्तुतः सचिवः स्नेहयुक्तः भवति चेत् तस्य राजा अपि प्रीतः भवति। राजा प्रीतः भवति चेत् कार्यं शीघ्रं सिद्धं भवति। अत एव हनुमान् स्नेहयुक्तः भवति चेत् यस्य कार्यस्य कृते रामलक्ष्मणौ अत्र आगतवन्तौ तत् कार्यं सिद्धं भविष्यति।

व्याकरणविमर्शः -

- अभ्यभाष – अभिपूर्वकात् भाष्-धातोः लोट्लकारे मध्यमपुरुषैकवचने अभ्यभाष इति रूपम्। अत्र भाष्-धातोः अडागमः, ततः परस्मैपदप्रयोगश्च आर्षः।
- सुग्रीवसचिवम् - सुग्रीवस्य सचिवः सुग्रीवसचिवः इति षष्ठीतत्पुरुषसमासः, तं सुग्रीवसचिवम्।

- स्नेहयुक्तम् - स्नेहेन युक्तः स्नेहयुक्तः इति तृतीयातत्पुरुषसमासः, तं स्नेहयुक्तम्।

सन्धिकार्यम् -

- मधुरैर्वाक्यैः = मधुरैः + वाक्यैः। (विसर्गसन्धिः)

प्रयोगपरिवर्तनम् - सौमित्रे! स सुग्रीवसचिवः कपिः वाक्यज्ञः अरिन्दमः स्नेहयुक्तः मधुरैः वाक्यैः अभिभाष्यताम्।

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः।
नासामवेदविदुषः शक्यमेवं विभाषितुम्।।२८

अन्वयः - अनृग्वेदविनीतस्य अयजुर्वेदधारिणः असामवेदविदुषः एवं विभाषितुं न शक्यम्।

अन्वयार्थः - अनृग्वेदविनीतस्य साभिप्राय-ऋग्वेदाभ्यासरहितस्य अयजुर्वेदधारिणः यजुर्वेदाज्ञस्य असामवेदविदुषः ऊहरहस्यादिगर्भितगानविशेषाज्ञस्य एवं इत्थं विभाषितुं भाषणं कर्तुं न शक्यम् अशक्यम्।

सरलार्थः - रामः हनुमतः पाण्डित्येन मुग्धः सन् लक्ष्मणम् उक्तवान् यत् - यः सम्पूर्णम् ऋग्वेदं न जानाति, यः सम्पूर्णं यजुर्वेदं न अधीतवान्, यः सामवेदस्य विद्वान् नास्ति, स एवं पाण्डित्यपूर्णं वाक्यं वक्तुं न शक्नोति। अर्थात् हनुमान् सर्ववेदज्ञः इत्यर्थः।

तात्पर्यार्थः - रामायणस्य प्रसिद्धेषु श्लोकेषु अन्यतमः अयं श्लोकः। अस्मिन् श्लोके महर्षिः वाल्मीकिः हनुमतः महाज्ञानित्वं सर्ववेदज्ञत्वं च वर्णयति। रामः हनुमतः ज्ञानं वाक्यप्रयोगे निपुणतां च दृष्ट्वा विस्मितः अभवत्। अत एव स भ्रातरं लक्ष्मणम् उक्तवान् यत् - यः गुरुसमीपे श्रद्धापूर्वकम् स्वरादिकं प्रयुज्य मन्त्रार्थं च ज्ञात्वा ऋग्वेदं न पठति, स एवंविधं ज्ञानपूर्णं भाषणं भाषितुं न शक्नोति, किञ्च यः यजुर्वेदं सक्यक् न अधीतवान्, अर्थात् यजुर्वेदे प्रत्येकस्मिन् अनुवाके अन्यस्य अनुवाकस्य सांकर्यं वर्तते, अतः तत् धारयितुं यः न शक्नोति, सः एवंविधं भाषणं भाषितुं न शक्नोति। अपि च यः नियमपूर्वकं सामवेदम् न अधीतवान्, अर्थात् सामवेदे बहूनि रहस्यादिगर्भितानि गानानि सन्ति, तानि गानानि यः न जानाति, स एवंविधं भाषणं भाषितुं न शक्नोति इति।

अनेन हनुमान् ऋग्वेदं श्रद्धापूर्वकं पठितवान्, यजुर्वेदम् अपि सम्यक् अधीतवान्, सामवेदं च नियमपूर्वम् अधीतवान् इति वक्तुम् इच्छति श्रीरामः। साधारणतया लोके एवंविधः विद्वान् दुष्करः वर्तते। रामसदृशः महान् ज्ञानी हनुमतः प्रशंसां करोति। अतः हनुमान् सामान्यः न सूचितं भवति।

व्याकरणविमर्शः -

- अनृग्वेदविनीतस्य – ऋग्वेदस्य विनीतः ऋग्वेदविनीतः इति षष्ठीतत्पुरुषसमासः। न ऋग्वेदविनीतः अनृग्वेदविनीतः इति नञ्तत्पुरुषसमासः, तस्य अनृग्वेदविनीतस्य।
- अयजुर्वेदधारिणः- यजुर्वेदं धारयति इति यजुर्वेदधारी, न यजुर्वेदधारी अयजुर्वेदधारी इति नञ्तत्पुरुषसमासः, तस्य अयजुर्वेदधारिणः।

- असामवेदविदुषः - सामवेदस्य विद्वान् सामवेदविद्वान् इति षष्ठीतत्पुरुषसमासः। न सामवेदविद्वान् असामवेदविद्वान् इति नञ्तत्पुरुषसमासः, तस्य असामवेदविदुषः।
- विभाषितुम् - विपूर्वकात् भाष्-धातोः तुमुन्प्रत्यये विभाषितुम् इति रूपम्।

सन्धिकार्यम् -

- नानृग्वेदविनीतस्य = न + अनृग्वेदविनीतस्य। (सवर्णदीर्घसन्धिः)
- नायजुर्वेदधारिणः = न + अयजुर्वेदधारिणः। (सवर्णदीर्घसन्धिः)
- नासामवेदविदुषः = न + असामवेदविदुषः। (सवर्णदीर्घसन्धिः)

प्रयोगपरिवर्तनम् - अनृग्वेदविनीतः अयजुर्वेदधारी असामवेदविद्वान् एवं विभाषितुं न शक्नुयात्।

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहु व्याहरताऽनेन न किंचिदपशब्दितम्।।२९।।

अन्वयः - नूनम अनेन कृत्स्नं व्याकरणं बहुधा श्रुतम्। (अत एव) बहु व्याहरता अनेन किञ्चित् न अपशब्दितम्।

अन्वयार्थः - नूनम् अनेन हनुमता कृत्स्नं समग्रं व्याकरणं व्याकरणशास्त्रं बहुधा बहुवारं श्रुतम् अधीतम्। (अत एव) बहु अनेकविधं व्यहरता कथयता अनेन किञ्चित् न अपशब्दितम् अशुद्धं भाषितम्।

सरलार्थः - हनुमतः पाण्डित्येन मुग्धः रामः लक्ष्मणम् उक्तवान् यत् - हनुमान् सम्पूर्णं व्याकरणं बहुवारं पठितवान्, अत एव स एतावत्कालपर्यन्तं बहु किमपि उक्तवान्, परन्तु न एकस्यापि अपशब्दस्य प्रयोगं कृतवान्।

तात्पर्यार्थः - पूर्वस्मिन् श्लोके रामः हनुमतः वेदज्ञत्वविषये उक्तवान्। अतः सम्प्रति तस्य व्याकरणज्ञानित्वम् अपि वदति। रामः पार्श्वे स्थितं भ्रातरं लक्ष्मणम् उक्तवान् यत् - अयं हनुमान् न केवलं वेदम् एव जानाति, अयं तु सम्पूर्णं व्याकरणशास्त्रं बहुवारम् अधीतवान्। अतः कः शब्दः साधुः अस्ति, कः शब्दः असाधुः अस्ति इति ज्ञानं तस्य वर्तते। किञ्च कस्य शब्दस्य कः अर्थः इत्यपि ज्ञानं तस्य वर्तते। तस्मात् स एतावत्कालपर्यन्तं बहु भाषितवान्, परन्तु एकस्यापि अपशब्दस्य प्रयोगं न कृतवान्। सर्वेषां शब्दानां कः प्रत्ययः अस्ति, का च प्रकृतिः अस्ति इति सम्यक्-तया जानाति हनुमान्। अतः स सर्वान् साधुशब्दान् एव स्व-स्व-अर्थे प्रयुक्तवान्। वस्तुतः अनेन श्लोकेन, हनुमान् वेद-व्याकरण-इत्यादिसर्वविषयान् जानाति इति वर्णयिति महर्षिः वाल्मीकिः।

व्याकरणविमर्शः -

- श्रुतम् - श्रवणार्थकात् श्रुधातोः क्तप्रत्यये श्रुतम् इति रूपम्।
- व्याहरता - विपूर्वकात् आपूर्वकात् च हृधातोः शतृप्रत्यये तृतीयैकवचने व्याहरता इति रूपम्।
- अपशब्दितम् - अपपूर्वकात् शब्द-धातोः क्तप्रत्यये नपुंसकलिङ्गे अपशब्दितम् इति रूपम्।

सन्धिकार्यम् -

- व्याहरताऽनेन = व्याहरता अनेन। (सवर्णदीर्घसन्धिः)

प्रयोगपरिवर्तनम् - नूनम् अयं कृत्स्नं व्याकरणं बहुधा श्रुतवान्। (अत एव) बहु व्याहरन् अयं किञ्चित् न अपशब्दितवान्।

न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा।
अन्येष्वपि च सर्वेषु दोषः संविदितः क्वचित्।।३०।।

अन्वयः - (अस्य) मुखे नेत्रयोः ललाटे भ्रुवोः च तथा अन्येषु सर्वेषु (अङ्गेषु) न क्वचित् दोषः संविदितः।

अन्वयार्थः - (अस्य हनुमतः) मुखे वदने नेत्रयोः नयनयोः ललाटे अलिके भ्रुवोः भ्रूमध्ये च तथा अन्येषु एतद्भिन्नेषु सर्वेषु सकलेषु (अङ्गेषु) न क्वचित् कुत्रचित्, दोषः विकारादिदोषः संविदितः लक्षितः।

सरलार्थः - श्रीरामः भ्रातरं लक्ष्मणं प्रति उक्तवान् यत् - हनुमान् एतावत्कालपर्यन्तं बहु किमपि भाषितवान्, परन्तु अस्य न कस्मिंश्चित् अङ्गे न कश्चन दोषः दृष्टः इति। हनुमान् शिक्षाशास्त्रं सम्यक् जानाति इत्यर्थः।

तात्पर्यार्थः - अस्मिन् श्लोके महर्षिः वाल्मीकिः हनुमतः शिक्षाशास्त्रज्ञत्वं वर्णयति। साधारणजनाः यदा वार्तालापं कुर्वन्ति तदा तेषां मुख-ललाट-इत्यादिषु अङ्गेषु भिन्ना भिन्ना विकृतिः दृश्यते। वार्तालापसमये अङ्गेषु एवं विकृतिः भवति चेत् शिक्षाशास्त्रे स वक्तुः दोषः इति उच्यते। परन्तु हनुमतः अयं दोषः नासीत् इति रामः उक्तवान्। हनुमान् रामलक्ष्मणयोः समीपम् आगत्य बहु किमपि उक्तवान्। परन्तु तस्य मुखे चक्षुर्द्वये ललाटे भ्रूमध्ये किञ्च एतद्भिन्नेषु अङ्गेषु न कापि विकृतिः अभवत्। तेन हनुमान् शिक्षाशास्त्रम् अपि सक्यक्-तया पठितवान् इति ज्ञायते। अत एव स दोषान् सक्यक् जानाति। अत्र च रामः अपि सूक्ष्मदर्शी इति ज्ञायते। अत एव वार्तालापसमये हनुमतः अङ्गेषु विकृतिः न अभवत् इति सूक्ष्मं विषयम् अपि स लक्षितवान्।

सन्धिकार्यम् -

- नेत्रयोश्चापि = नेत्रयोः + च + अपि। (विसर्गसन्धिः, सवर्णदीर्घसन्धिः)
- भ्रुवोस्तथा = भ्रुवोः + तथा। (विसर्गसन्धिः)
- अन्येष्वपि = अन्येषु + अपि। (यण्-सन्धिः)

प्रयोगपरिवर्तनम् - (अस्य) मुखे नेत्रयोः ललाटे भ्रुवोः च तथा अन्येषु सर्वेषु (अङ्गेषु) न क्वचित् दोषं संविदितवान् (अहम्)।

अविस्तरमसंदिग्धमविलम्बितमव्यथम्।
उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम्।।३१।।

अन्वयः - (अस्य) अविस्तरम् असंदिग्धम् अविलम्बितम् अव्यथम् उरःस्थं कण्ठगं मध्यमस्वरं वाक्यं वर्तते।

अन्वयार्थः -(अस्य हनुमतः) अविस्तरम् विस्ताररहितम् असंदिग्धम् सन्देहरहितम् अविलम्बितम् अद्रुतम् अव्यथम् न व्यथाप्रदायकम् उरःस्थं मन्द्रं कण्ठगं मध्यमस्वरं मध्यमस्वरयुक्तं वाक्यं वचनं वर्तते अस्ति।

सरलार्थः - श्रीरामः हनुमता प्रयुक्तस्य वाक्यस्य प्रशंसां कुर्वन् लक्ष्मणम् उक्तवान् यत् - हनुमान् यद् यद् वाक्यम् प्रयुक्तवान्, तत् वाक्यं बहुविस्तृतं नास्ति, सन्देहरहितं वर्तते, बहु द्रुतम् अपि न उच्चारितं, किञ्च श्रोतॄणां व्यथादायकं नास्ति, अपि च मध्यमस्वरेण प्रयुक्तं वर्तते इति ।

तात्पर्यार्थः - प्रस्तुतश्लोकेन रामः हनुमतः वाक्यरचनायाः सौष्ठवं वर्णयति। साधारणजनाः यत् वाक्यं प्रयुञ्जन्ते तत् कदाचित् बहु विस्तृतं भवति, किञ्च किम् अक्षरं प्रयुक्तम् इति अवगमने कदाचित् सन्देहः भवति। कदाचित् तु जनाः वाक्यं बहु द्रुतम् उच्चारयन्ति, तस्मात् तत् श्रवणेन कर्णे व्यथा उत्पद्यते, अर्थात् बहु श्रुतिकटु भवति। शिक्षाशास्त्रानुसारम् एते अपि वक्तुः दोषाः। एतादृशः एकोऽपि दोषः हनुमतः नासीत्। हनुमान् यत् यत् वाक्यं प्रयुक्तवान् तत् बहु संक्षिप्तम्, किञ्च एवंप्रकारेण स वर्णान् प्रयुक्तवान् येन वर्णबोधे रामस्य न कोऽपि सन्देहः उत्पन्नः। अपि च स वाक्यानि बहु द्रुतं न उच्चारितवान्, तेन तानि वाक्यानि श्रुतिमधुराणि आसन्। किञ्च स सर्वदा मध्यमस्वरेण एव वाक्यानि प्रयुक्तवान्। वाक्यप्रयोगविषये शिक्षाशास्त्रे उक्ताः दोषाः हनुमतः नासन् इति वर्णयति महर्षिः वाल्मीकिः अनेन श्लोकेन।

व्याकरणविमर्शः -

- अविस्तरम् - अविद्यमानः विस्तरः यस्मिन् तत् अविस्तरम् इति बहुव्रीहिसमासः।
- असन्दिग्धम् - न सन्दिग्धम् असन्दिग्धम् इति नञ्तत्पुरुषसमासः।
- अविलम्बितम् - न विलम्बितम् अविलम्बितम् इति नञ्तत्पुरुषसमासः।
- अव्यथम् - न विद्यते व्यथा यस्मात् तत् अव्यथम् इति बहुव्रीहिसमासः।
- मध्यमस्वरम् - मध्यमः स्वरः यस्य तत् मध्यमस्वरम् इति बहुव्रीहिसमासः।

प्रयोगपरिवर्तनम् - (अस्य) अविस्तरेण असंदिग्धेन अविलम्बितेन अव्यथेन उरःस्थेन कण्ठगेन मध्यमस्वरेण वाक्येन वृत्यते।

संस्कारक्रमसंपन्नामद्रुतामविलम्बिताम्।
उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम्।।३२।।

अन्वयः - (अयं) संस्कारक्रमसंपन्नाम् अद्रुताम् अविलम्बितां हृदयहर्षिणीं कल्याणीं वाचम् उच्चारयति।

अन्वयार्थः - (अयं हनुमान्) संस्कारक्रमसंपन्नाम् संस्काराणां जनने समर्थाम् अद्भुताम् अतिशीघ्र-उच्चारणरहिताम् अविलम्बितां अविलम्बेन उच्चारितां हृदयहर्षिणीं मधुरां कल्याणीं कल्याणप्रदां वाचम् सरस्वतीम् उच्चारयति वदति।

सरलार्थः - रामः हनुमतः वाचः प्रशंसां कुर्वन् लक्ष्मणम् उक्तवान् यत् - हनुमतः वाक् क्रमेण शिक्षाव्याकरण-इत्यादिसंस्कारान् जनयति, किञ्च ये वर्णाः प्रयुक्ताः, तेषां ध्वंसं करोति यत् शीघ्रोच्चारणं तद्रहिता, विलम्बेन न उच्चारिता वर्तते। अपि च तस्य वाचः श्रवणेन हृदये आह्लादः भवति इति।

तात्पर्यार्थः - अस्मिन् श्लोके रामः पार्श्वे स्थितं भ्रातरं लक्ष्मणं प्रति हनुमता प्रयुक्तायाः वाचः माहात्म्यं वदति। वर्णानाम् अतिशीघ्रम् उच्चारणं क्रियते चेत्, ये वर्णाः यथायथम् उक्ताः, ते अपि ध्वंसाः भवन्ति, अर्थात् सम्यक् न श्रूयन्ते। किञ्च द्वयोः शब्दयोः मध्ये उच्चारणे महान् विलम्बः भवति चेत्, वाक्यस्य अर्थः नावगम्यते। हनुमतः वाक् तु क्रमेण शिक्षा-व्याकरण-इत्यादीनां संस्कारान् जनयति, अर्थात् हनुमतः वाक् शिक्षा-व्याकरण-इत्यादिशास्त्रदृष्ट्या यथायथं वर्तते। किञ्च अतिशीघ्रोच्चारणरहिता, तस्मात् यथायथं प्रयुक्तानां वर्णानां ध्वंसं न करोति। किञ्च तस्य द्वयोः शब्दयोः मध्ये उच्चारणे महान् विलम्बः नासीत्, अत एव शब्दयोः मध्ये सम्बन्धः आसीत्। एतान् विहाय अपि बहवः गुणाः तस्य वाण्याम् आसीत्। एवंगुणयुक्तां तस्य वाचं श्रुत्वा रामः अतीव आनन्दितः जातः।

व्याकरणविमर्शः -

- संस्कारक्रमसंपन्नाम् - संस्काराणां क्रमः संस्कारक्रमः इति षष्ठीतत्पुरुषसमासः। संस्कारक्रमे संपन्ना संस्कारक्रमसम्पन्ना इति सप्तमीतत्पुरुषसमासः, तां संस्कारक्रमसंपन्नाम्।
- अविलम्बिताम् - न विलम्बिता अविलम्बिता इति नञ्तत्पुरुषसमासः।
- हृदयहर्षिणीम् - हृदयं हर्षयति इति हृदयहर्षणी। तां हृदयहर्षिणीम्।

प्रयोगपरिवर्तनम् - (अनेन हनुमता) संस्कारक्रमसंपन्ना अद्भुता अविलम्बिता हृदयहर्षिणी कल्याणी वाक् उच्चार्यते।

अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया।
कस्य नाराध्यते चित्तमुद्यतासेररेरपि।।३३।।

अन्वयः - अनया चित्रया त्रिस्थानव्यञ्जनस्थया वाचा उद्यतासेः अपि कस्य अरेः चित्तं न आराध्यते।

अन्वयार्थः - अनया चित्रया आश्चर्यावहया त्रिस्थानव्यञ्जनस्थया त्रिषु स्थानेषु उरःकण्ठशिरःसु उच्चारितया वाचा वाण्या उद्यतासेः उद्यखड्गस्य अपि कस्य अरेः शत्रोः चित्तं मनः न आराध्यते अनुकूल्यते।

सरलार्थः - रामः हनुमतः वाण्याः प्रंशसां कृतवान् यत् - सा वाक् वक्षःकण्ठशिरःसु त्रिषु स्थानेषु उच्चारिता, तस्मात् सा वाक् आश्चर्यजनिका वर्तते, असिं धृत्वा मारयितुं प्रवृतं शत्रुं प्रति एवंविधा वाक् प्रयुज्यते चेत् स शत्रुः अपि सन्तुष्टः भवति इति।

तात्पर्यार्थः - अस्मिन् श्लोके रामः पार्श्वे स्थितं भ्रातरं लक्ष्मणं प्रति हनुमता प्रयुक्तायाः वाचः सामर्थ्यं वदति। वर्णाः त्रिविधाः भवन्ति उदात्तः अनुदात्तः स्वरितः च। उदात्तवर्णस्य उच्चारणं शिरसि भवति। अनुदात्तवर्णस्य उच्चारणं वक्षसि भवति। स्वरितवर्णस्य च उच्चारणं कण्ठे भवति। उदात्त-अनुदात्त-स्वरित-इति स्वरसहितः वर्णः प्रयुज्यते चेत् स वर्णः साधुः भवति। हनुमतः वाक् शिरः-वक्षः-कण्ठ-इत्यादिस्थानेषु उच्चारिता आसीत्। अर्थात् हनुमान् उदात्त-अनुदात्त-स्वरित-इति स्वरसहितान् एव वर्णान् प्रयुक्तवान् इति ज्ञायते। असिं धृत्वा मारयितुम् उद्यतम् शत्रुं प्रति कश्चित् जनः यदि एवं रमणीयायाः वाचः प्रयोगं करोति, तर्हि स शत्रुः अपि तया वाचा महान् सन्तुष्टः भवति। पुनः तस्य हानिं न जनयति। एवंविधं सामर्थ्यम् आसीत् हनुमतः वाचः।

व्याकरणविमर्शः -

- त्रिस्थानव्यञ्जनस्थया - त्रीणि च तानि स्थानानि त्रिस्थानानि इति इतरेतरयोगद्वन्द्वसमासः। त्रिस्थानेषु व्यञ्जनं त्रिस्थानव्यञ्जनम् इति सप्तमीतत्पुरुषसमासः। त्रिस्थानव्यञ्जनेषु तिष्ठति इति त्रिस्थानव्यञ्जनस्था, तया त्रिस्थानव्यञ्जनस्थया।
- आराध्यते - आपूर्वकात् राध-धातोः कर्मणि आराध्यते इति रूपम्।
- उद्यतासेः - उद्यतः असिः येन स उद्यतासिः इति बहुव्रीहिसमासः, तस्य उद्यतासेः।

सन्धिकार्यम् -

- नाराध्यते = न + आराध्यते। (सवर्णदीर्घसन्धिः)
- उद्यतासेररेः = उद्यतासेः + अरेः। (विसर्गसन्धिः)
- अरेरपि = अरेः + अपि। (विसर्गसन्धिः)

प्रयोगपरिवर्तनम् - इयं चित्रा त्रिस्थानव्यञ्जनस्था वाक् उद्यतासेः अपि कस्य अरेः चित्तं न आराध्नोति।

एवंविधो यस्य दूतो न भवेत् पार्थिवस्य तु।
सिध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ।।३४।।

अन्वयः - (हे) अनघ! यस्य पार्थिवस्य एवंविधः दूतः न भवेत् तस्य कार्याणां गतयः कथं सिध्यन्ति

अन्वयार्थः - (हे) अनघ! हे पापरहित लक्ष्मण! यस्य पार्थिवस्य राज्ञः एवंविधः एवंगुणयुक्तः दूतः चरः न भवेत् न स्यात् तस्य राज्ञः कार्याणां कर्माणां गतयःफलानि कथं कस्मात् कारणात् सिध्यन्ति सिद्धानि भवन्ति।

सरलार्थः - रामः पार्श्वे स्थितं भ्रातरं लक्ष्मणम् उक्तवान् यत् - यस्य राज्ञः हनुमत्सदृशः महाज्ञानी वाक्यकुशलः सर्ववेदज्ञः दूतः भवति, स राजा दूतवाक्यानुसारं कार्यं करोति चेत् तस्य सर्वेषां कार्याणां सिद्धिः अवश्यं भवति इति।

तात्पर्यार्थः - अस्मिन् श्लोके रामः हनुमतः दूतत्वस्य प्रशंसां करोति। दूतः ज्ञानी चतुरः वाक्कुशलः वा भवति चेत् राज्ञः बहु सौकर्यं भवति। तस्य कार्याणि शीघ्रम् एव सिध्यन्ति। मूर्खः दूतस्तु शत्रूणां समीपे राज्ञः गुप्तं तत्त्वं कथयेत्। अतः दूतः मूर्खः भवति चेत् राज्ञः हानिः एव सम्भवति। वानरराजस्य सुग्रीवस्य दूतः आसीत् हनुमान्। स महाज्ञानी, वाक्कुशलः सर्ववेदज्ञः व्याकरण-शिक्षा-इत्यादिशास्त्रज्ञः च आसीत्। अत एव रामः भ्रातरं लक्ष्मणम् उक्तवान् यत् - एवंगुणसम्पन्नः हनुमत्सदृशः दूतः यस्य राज्ञः अस्ति, तस्य राज्ञः सर्वाणि कार्याणि अवश्यम् एव सिध्यन्ति, न एकम् अपि कर्म निष्फलं भवति। अस्मिन् श्लोके रामः भ्रातरं लक्ष्मणम् अनघ इति सम्बोधनं कृतवान्। अनघः इत्यस्य अर्थः यस्य न किञ्चित् पापं वर्तते सः इति। तस्मात् लक्ष्मणः सम्पूर्णतया पापरहितः आसीत् इति लक्ष्मणस्य माहात्म्यम् अपि अत्र सिध्यति।

व्याकरणविमर्शः -

- अनघ – अविद्यमानम् अघं यस्मिन् सः अनघः इति बहुव्रीहिसमासः। अनघशब्दस्य सम्बोधनैकवचने अनघ! इति रूपम्।

सन्धिकार्यम् -

- एवंविधो यस्य = एवंविधः + यस्य। (विसर्गसन्धिः)
- दूतो न = दूतः + न। (विसर्गसन्धिः)
- गतयोऽनघ = गतयः + अनघ। (विसर्गसन्धिः)

प्रयोगपरिवर्तनम् - (हे) अनघ! यस्य पार्थिवस्य एवंविधेन दूतेन न भूयतां तस्य कार्याणां गतिभिः कथं सिध्यते।

एवंगुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः।
तस्य सिध्यन्ति सर्वेऽर्था दूतवाक्यप्रचोदिताः॥३५॥

अन्वयः - यस्य कार्यसाधकाः एवंगुणगणैः युक्ताः स्युः, तस्य सर्वे अर्थाः दूतवाक्यप्रचोदिताः (सन्तः) सिध्यन्ति।

अन्वयार्थः - यस्य राज्ञः कार्यसाधकाः कर्मचारिणः एवंगुणगणैः वाक्चातुर्यादिगुणसमूहैः युक्ताः युताः स्युः भवेयुः, तस्य राज्ञः सर्वे अर्थाः सर्वाणि कार्याणि दूतवाक्यप्रचोदिताः दूतवाक्यानुसारं कृताः (सन्तः) सिध्यन्ति सिद्धा भवन्ति।

सरलार्थः - रामः हनुमतः विषये लक्ष्मणम् अवदत् यत् - कस्यचित् राज्ञः यदि हनुमत्सदृशः विद्वान् वाक्कुशलः कर्मचारी भवति, तर्हि तस्य कर्मचारिणः वाक्यानुसारेण कार्यं क्रियते चेत् तत् कार्यम् अवश्यं सिद्धं भवति।

तात्पर्यार्थः - सर्ववेदज्ञत्वं, वाक्माधुर्यं, वाक्कुशलत्वं व्याकरण-शिक्षा-इत्यादिशास्त्रज्ञत्वम् इत्यादयः बहवः गुणाः हनुमति आसन्। हनुमान् च वानरराजस्य सुग्रीवस्य सचिवः आसीत्। अत एव

रामः भ्रातरं लक्ष्मणम् उक्तवान् यत् - यस्य राज्ञः एवंगुणसमूहैः युक्तः हनुमत्सदृशः कार्यसहायकः भवति, स राजा यदि तस्य कार्यसहायकस्य सचिवस्य निर्देशानुसारेण कार्यं सम्पादयति, तर्हि तानि कार्याणि अवश्यम् एव सिध्यन्ति। अत एव राज्ञा तादृशस्य गुणसम्पन्नस्य सचिवस्य एव नियुक्तिः करणीया इत्यपि ज्ञायते। राजकार्यार्थं मूर्खः सचिवः नियुज्यते चेत् राज्ञः सर्वं कार्यं निष्फलम् एव भवति। किञ्च अनेन राज्ञः सुग्रीवस्यापि शीघ्रम् एव अभीष्टलाभः भविष्यति इति सूचितवान् रामः। वस्तुतः रामः हनुमतः एवं प्रशंसां कृतवान्, तेन हनुमति स महाप्रसन्नः जातः इति ज्ञायते।

व्याकरणविमर्शः -

- युक्ताः - युज्-धातोः क्तप्रत्यये प्रथमाबहुवचने युक्ताः इति रूपम्।
- स्युः - अस्-धातोः लोट्लकारे प्रथमपुरुषबहुवचने स्युः इति रूपम्।
- कार्यसाधकाः - कार्यं साधयन्ति इति कार्यसाधकाः।
- दूतवाक्यप्रचोदिताः - दूतस्य वाक्यं दूतवाक्यम् इति षष्ठीतत्पुरुषसमासः। दूतवाक्येन प्रचोदिताः दूतवाक्यप्रचोदिताः इति तृतीयातत्पुरुषसमासः।

सन्धिकार्यम् -

- गुणगणैर्युक्ताः = गुणगणैः + युक्ताः। (विसर्गसन्धिः)
- युक्ता यस्य = युक्ताः + यस्य। (विसर्गसन्धिः)
- सर्वेऽर्थाः = सर्वे + अर्थाः। (पूर्वरूपसन्धिः)

प्रयोगपरिवर्तनम् - यस्य कार्यसाधकैः एवंगुणगणैः युक्तैः भवेयम्, तस्य सर्वैः अर्थैः दूतवाक्यप्रचोदितैः (सद्भिः) सिध्यते।

पाठगतप्रश्नाः

१. हनुमान् कस्य सचिवः आसीत्।

२. कस्य एवं विभाषितुं न शक्यं भवति।

३. किं शास्त्रं हनुमता बहुधा श्रुतम्।

४. हनुमतः केषु अङ्गेषु दोषः न संविदितः।

५. हनुमान् कीदृशं वाक्यम् उक्तवान्।

६. हनुमतः वाक् कीदृशी आसीत्।

७. हनुमतः त्रिस्थानव्यञ्जनस्थया चित्रया वाचा कस्य चित्तम् आराध्यते।

८. हनुमत्सदृशः दूतः भवति चेत् पार्थिवस्य किं सिध्यति।

९. राज्ञः अर्थाः कथं सिध्यन्ति।

१०. वाक्यज्ञो वाक्यकुशलः पुनर्नोवाच किञ्चन – इत्यत्र वाक्यज्ञः इत्यनेन कः निर्दिष्टः

क)लक्ष्मणः ख)हनुमान्

ग)रामः घ)वाली

११. रामलक्ष्मणौ कम् अन्विषन्तौ पम्पानद्याः तीरे उपस्थितौ

क)सुग्रीवम् ख)वालिनम्

ख)हनुमन्तम् ग)सीताम्

१२. सौमित्रे - इत्यनेन कः सम्बोधितः

क)रामः ख)हनुमान्

ग)सुग्रीवः घ)लक्ष्मणः

१३. तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम् - इति कस्य उक्तिः

क)लक्ष्मणस्य ख)हनुमतः

ग)रामस्य घ)सुग्रीवस्य

१४. अविस्तरम् असन्दिग्धम् अविलम्बितम् अव्यथम् इत्येतादृशं वाक्यं कस्य

क)सुग्रीवस्य ख)रामस्य

ग)हनुमतः घ)लक्मणस्य

१५. क-स्तम्भेन सह ख-स्तम्भं मेलयतु - -

क-स्तम्भः	**ख-स्तम्भः**
१. प्रहृष्टवदनः	क. समीपम्
२. सौमित्रिः	ख. विद्यते
३. अन्तिकम्	ग. श्रीरामः
४. महावैयाकरणः	घ. वदति
५. मध्यमस्वरम्	ङ. लक्ष्मणः
६. वर्तते	च. हनुमता सदृशः
७. हृदयहर्षिणी	छ. हनुमान्
८. उच्चारयति	ज. सन्तोष्यते
९. दूतः	झ. वाक्यम्
१०. आराध्यते	ञ. वाक्

पाठसारः

सुग्रीवादेशानुसारं हनुमान् स्ववानररूपम् आच्छाद्य भिक्षुकवेषेण पम्पासरोवरतीरे स्थितयोः रामलक्ष्मणयोः समीपम् उपस्थितः। तत्र गत्वा च स तयोः पूजनादिकं विधाय तयोः वीरत्वस्य सौन्दर्यस्य

च प्रशंसां कृतवान्। ततः स सुग्रीवविषये ताभ्याम् उक्त्वा सुग्रीवसचिवत्वेन स्वपरिचयं प्रदत्तवान्। ततः स पुनः किमपि अनुक्त्वा तूष्णीम् एव स्थितवान्। तस्य एतत्सर्वं वचनं श्रुत्वा श्रीरामः महान् आनन्दितो जातः। तस्य पार्श्वे एव भ्राता लक्ष्मणः आसीत्। ततः स लक्ष्मणम् उद्दिश्य हनुमतः प्रशंसां कर्तुम् आरब्धवान्। एतावत्कालपर्यन्तं हनुमान् यादृशीं भाषां प्रयुक्तवान्, तादृशं कथयितुं तु कश्चन महान् ज्ञानी सर्ववेदानां विद्वान् एव शक्नुयात्। तेन हनुमान् ऋग्वेद-सामवेद-यजुर्वेद-इति त्रयाणां वेदानाम् एव ज्ञाता आसीत् इति प्रशंसति श्रीरामः। एतावन्तं समयं बहु किमपि कथयतः तस्य मुखात् न कश्चन अपशब्दः प्रयुक्तः। कश्चन यदि व्याकरणशास्त्रं बहुवारम् अधीतवान् स्यात्, स एव एवं भाषितुं शक्नोति इति हनुमतः वैयाकरणत्वं प्रशंसति श्रीरामः।

हनुमान् न केवलं व्याकरणशास्त्रम् अपि तु शिक्षादिशास्त्राणि अपि आमूलचूडम् अधीतवान्। अतः अत्र भाषणकाले अङ्गेषु विकृतिः इत्येतादृशाः ये दोषाः, तान् हनुमान् सम्यग्रूपेण जानाति स्म। अत एव बहु भाषमाणस्य तस्य न कस्मिंश्चित् अङ्गे विकृतिः लक्षिता श्रीरामेण। हनुमतः वाक् सम्पूर्णतया शिक्षाशास्त्रनिर्दिष्टा एव आसीत्। सर्वदा मध्यमस्वरेण एव स भाषमाण आसीत्। तस्य वचसः श्रवणेन व्याकरणादीनां संस्कारः उत्पन्नः भवति स्म श्रीरामस्य। अतः तच्छ्रवणेन परमानन्दः भगवान् श्रीरामः अपि आनन्दितः जातः। एवंविधा वाक् प्रयुज्यते चेत् असिं धृत्वा मारयितुं प्रवृत्तः अपि रिपुः वशीभूतः भवति इत्युक्त्वा तस्य वचसः माहात्म्यं प्रकाशितवान् श्रीरामः। कस्यापि राज्ञः एवंनानागुणयुक्तः दूतः भवति चेत् स राजा शीघ्रम् एव सिद्धिं गच्छेत् इत्यत्र नास्ति कोऽपि सन्देहः। किञ्च स राजा यदि दूतवाक्यानुसारं सर्वं कार्यं साधयेत् तर्हि अवश्यम् एव तस्य सर्वे अर्थाः सिद्धाः भवन्ति इति कथयन् श्रीरामः तस्य दूतत्वस्यापि प्रशंसां कृतवान् इति पाठस्यास्य सारः।

किमधिगतम्

- वाग्भूषणमेव सर्वभूषणापेक्षया यथायथं भूषयति मनुष्यान्।
- वाग्माधुर्येण भगवान् अपि महान्तं सन्तोषं प्राप्नोति।
- व्याकरण-शिक्षाशात्रज्ञस्य वाक्यप्रयोगसमये न कोऽपि **वाक्सम्बन्धी दोषः सम्भवति** ।
- वाचः शक्त्या तु असिं धृत्वा मारयितुं प्रवृत्तः अपि शत्रुः वशीभूतः भवति।
- **राज्ञा सर्वदा शास्त्रज्ञत्ववाग्माधुर्य-इत्यादिगुणयुक्तः दूतः नियोक्तव्यः** ।
- गुणिनः कार्यसहायकस्य निर्देशानुसारं कार्ये क्रियमाणे राज्ञः सर्वे अर्थाः सिध्यन्ति।

पाठान्तप्रश्नाः

१) रामः पार्श्वे स्थितं भ्रातरं किम् उक्तवान् इति सप्रसङ्गं लिखत।

२) हनुमतः व्याकरणज्ञानविषये रामस्य उक्तिं यथाग्रन्थम् आलोचयत।

३) नानृग्वेदविनीतस्य.....इत्यादिश्लोकस्य संक्षेपेण व्याख्यां लिखत।

४) हनुमतः वाचः सौन्दर्यं वर्णयत।

५) हनुमतः शिक्षाशास्त्रज्ञानविषये रामस्य उक्तिं यथाग्रन्थम् आलोचयत।

६) हनुमतः दूतत्वविषये रामेण किम् उक्तम्।

पाठगतप्रश्नानामुत्तराणि

१) कपीन्द्रस्य महात्मनः सुग्रीवस्य।

२) अनृग्वेदविनीतस्य अयजुर्वेदधारिणः असामवेदविदुषः

३) व्याकरणशास्त्रम्

४) मुखे नेत्रयोः ललटे भ्रुवोः तथा अन्येषु सर्वेषु अङ्गेषु

५) अविस्तरम् असन्दिग्धम् अविलम्बितम् अव्यथम् उरःस्थं कण्ठगं मध्यमस्वरं च

६) संस्कारक्रमसम्पन्ना अद्भुता अविलम्बिता कल्याणी हृदयहर्षिणी च

७) उद्यतासेः अरेः अपि

८) कार्याणां गतयः सिध्यन्ति

९) दूतवाक्यप्रचोदिताः सन्तः

१०) ख)

११) क)

१२) घ)

१३) ग)

१४) ग)

१५) १-ग, २-ङ, ३-क, ४-छ, ५-झ, ६-ख. ७-ञ, ८-घ, ९-च, १०-ज।

॥ इति चतुर्दशः पाठः ॥